Introduction



# शोधप्रबन्धस्य रूपरेखा

शब्दार्थौ द्वौ सम्मिलतौ काव्यम् जनयन्ते। तत्र काव्यस्य भेद द्वयम् भवति। गद्य काव्यं पद्यकाव्यञ्च। भाषामधिकृत्य काव्यस्य भेदत्रयम् भवति। संस्कृतकाव्यम् प्राकृतकाव्यम् अपभ्रंसकाव्यञ्चेति। विषयमाधिकृत्य काव्यम् चतुर्विधम् भवति। इतिवृत्तम् कविकल्पितम् कलाश्रितम् शास्त्राश्रितञ्च तदैव काव्यम् स्वरूपविधानमधिकृत्य पंञ्चधाभवति। महाकाव्यम् रूपकम् आख्यायिका कथा मुक्तकञ्चेति।

शब्दार्थौ सहितौ काव्यम्। शब्दार्थयोः मधुरसंबन्धेन काव्यम् निष्पन्नम् भवति। ननुशब्दार्थौ काव्यम् इति लक्षणम् रूद्रटाचार्येण प्रोक्तम्। शब्दार्थयोरभा भावेन काव्यं नैवनास्वाद्यते शब्दार्थद्वारा एव काव्यम् शोभा जनकम् भवति। शब्दार्थोयोः शोभाएव काव्यम् तेन आनन्दस्यापि अनुभूंतिः जायते शब्दार्थोयोः वक्र प्रयोगेण काव्यम् सौंदर्यम् जनयति। तेन आहलादोऽपि जायते। प्रसिद्धालंकारिकेण वामनाचार्येणापि काव्ये जायमानं सौन्दर्यम् एव प्रधानरूपेण स्वीकृतम्। तन्मते अलंकाराः एव काव्यस्य सौन्दर्यम्। एवम् प्रायः आलंकारिकैः शब्दार्थौ सहितौ काव्यम् प्रोक्तम् तेषु केचन आलंकारिकैः भिन्न-भिन्न रीत्या शब्दार्थद्वारा जायमनम् चमत्कारम् एव काव्यस्य मूलभूतम् तत्वम् स्वीकृतम्। सर्वेषाम् मतेन कवेः काव्यम् आहलाद्जनकम् आनन्ददायकम् च भवति तस्य आनन्दमेव मुख्यं प्रयोजनम् एनम् एव मम्मटाचार्येण सकल प्रयोजन मौलिभूतम् इति प्रोक्तम्। पण्डितराज जगन्नाथमते पुत्रस्तेजातः धनम् ते दास्यामि इत्यत्रापि आनन्दोजायते परंतु तदानन्दम् लौकिकत्वेन परिगण्यते। काव्य द्वारा अलौकिक आनन्दस्य प्राप्तिः भवति। तद् अलौकिक आनन्दम् ब्रह्मास्वाद सहोदरम् इव अनुभूयते।

आनन्दस्य अनुभूंतिरेव रसाः। काव्यम् श्रुत्वा नाट्यम् दृष्ट्वा आनन्दस्य अनुभूतिः भवति। रोमांचोऽपि जायते तदेव काव्ये जनितम् आनन्दम् मोक्षमार्गम् प्रसस्यते। अतः रसाः एव आनन्दम्। आनन्दमएव रसाः। तयोः परस्परम् साम्यभावम् भजते। कोऽयम् रसाः? किम् स्वरूपम् च तस्य इति अपेक्षायाम् कश्चिदाह यथा पयोः अम्लयोगेन् रूपांतरम् परिणतम् निष्पन्नम् स

दध्युच्यते। यथा लवंग, कर्पूर, मरिचादि योगेन परिणतम् निष्पन्नम् स प्रपाणकम् उच्यते। तथा रत्यादि स्थायीभावा: काव्योपस्थापित विभावादि योगेन सच्चिदानन्द इव आनन्दम् जनयन्ति। एवम् सच्चिदानन्द स्वरूपोऽयम रसा:। अयम् रसा: नैवउत्पेद्यते न च उत्पाद्यते न च अभिधाभावकत्व भोजकत्व व्यापारेण साधारणी क्रियन्ते। अयम् रसा: विभावादिनाम् व्यंज-व्यंजक भाव सम्बन्धात् आनन्दरूपेण, आनन्दाभिव्यक्तिरूपेण परिणमन्ते। स एव रसस्य काव्यस्य च मुख्यम् प्रयोजनम्।

विभाव अनुभाव व्यभिचारिभाव संयोगात् रस-निष्पति: भवति। इदमेव महर्षि भरतसूत्रम्। इदमेव सूत्रम् पुरस्कृत्य बहुभि: टीकाकृदभि: बहुधा व्याख्यातम्। विभावादिनाम् एव व्यंग-व्यंजक भाव सम्बन्धात् रसस्य अभिव्यक्ति भवति। इति अभिनवगुप्ताचार्य मतम् तन्मते चारूकाव्य विनिर्गतै: सहृदय-हृदय प्रविष्टै: भावना विशेषण बिगलित दुष्यन्तादि रमणीचात्वादिभि: शंकुन्तलादि आलम्बनै: कटाक्षादिरनुर्भावै: चिंताहर्षादि व्यभिचारिभिश्च संभूयोत्पादनेन अलौकिक व्यापारेण अज्ञानावरण भंगपूर्वकम् प्रमात्रा स्वप्रकाश निजानंदेन अनुभूयमाना: प्रस्थित वासना रूपा रत्यादि स्थायिभावा: एव रसा:। रसो न कदापि वाच्य: सदा व्यंग्यरूपो भवति। काव्ये यत्र-यत्र व्यंगस्य प्राधान्यम् भवति। स एव उत्तमम् काव्यम् इत्याचार्यै: प्रोक्तम्। रसो एव काव्यस्य मुख्यंतत्त्वम् सएव काव्यस्यात्मा इति आचार्यै: प्रोक्तम्। महाकविना विश्वनाथेन साहित्यदर्पणकारेण प्रथमे परिच्छेदे रसात्मकम् वाक्यं एव काव्यम् स्वीकृतम्। रसेनविना काव्यम् काव्यम् न भवति वार्तामात्रमेव। मम्मटाचार्येणापि रसस्य मुख्यं तत्वमेव काव्यं स्वीकृतम्। आचार्य विश्वनाथमते शब्दार्थौ ते शरीरम् रसादिश्चात्मा गुणा: शौर्यादिवत् दोषा: काणत्वादिवत् अलंकारा: कटक कुंडलादिवत् रीतयोऽवयव: संस्थान विशेषवत। उक्तञ्च ध्वन्यालोक लोचनकारेण वागवैदग्ध्य प्रधानेऽपि रसएवानजिवितम् अत: रसएव काव्यस्य जीवितम्तत्वम्। इत्थम् रसैव काव्यस्य जीवितम् तत्वम्। शब्दार्थ शरीरस्य आत्मारूपेण वामनाचार्येण रीति: काव्यस्यात्मा, आनन्दवर्धना चार्येण ध्वनि: कुन्तकाचार्येण वक्रोक्ति: क्षेमेन्द्राचार्येण औचित्यम् काव्यस्य जीवितम् तत्वम् स्वीकृतम्। काव्यस्य जीवितम् तत्वम् औचित्यमिति क्षेमेन्द्राचार्येण

प्रोक्तम्। औचित्यम्नाम उचित सन्निवेश: उचितस्थाने विनिवेश्यम्। यथा माधुर्यादिगुणानाम् वीर, बीभत्स, रसेषु संयोजनेन ते दोषरूपा: भवन्ति। यमकादिनाम करूण श्रृंगार रसे नियोजनम् अनौचित्यम् एव अत:। मुनिनाभरतेन अपि नाटकादिनाम् अभिनयसमये नायक नायिकायो: वेशभूषायाम् विनियोजनं आवश्यकम् प्रोक्तम्। भामहा चार्येणापि औचित्यस्य महिमा अंगीकृता। तन्मते कृष्णकज्जलम् नायिका यदि चिबुकेलेपयति तदा तस्या: सौंदर्यम् अनौचित्यं भवति। यदि तदैव अंजनम् लोचनपात्रे विलोपयति तदा नायिकाया: स्वभाव: उत्तरोत्तर आह्लादजनकम् भवति। यावत: शब्दार्थौ व्यंजकोन तावत् रसांगेनविभावादया: एव स्थायीभावेन सह साधरणीक्रियन्ते।

रत्यादि स्थायिभावानाम् उद्बोधका: एव विभावा: साहित्यदर्पणकारेण प्रोक्तम्। रत्यादि उद्बोधकालोके विभावा: काव्य नाट्ययो:। रसभावनायाम् न केवलम् काव्यशब्दभावका: नवा केवलम् अर्था:। अर्थपरिज्ञाने काव्यशब्दात् भावकत्वम् नोपपद्यते। लौकिक व्यवहारेण अर्थस्य अभिधान् कृते अर्थानामपि च भावकत्वम् भवति। अतो तयोरभावकत्वम् स्वीकार्यम्। वाच्य-वाचक भावा: परिवसतो गुणालंकारो उपकृतैव शब्दार्थौ रसान्भावयति स्वीकार्यम्।

रत्यादीनां उद्बोधका: भावा: एव काव्ये नाट्ये च विभावरूपेण कथ्यन्ते। तत्र आलम्बन विभावा: नायक-नायिकादया: उद्दीपनविभावा: कोकिलालाप: चन्द्र शीतलमन्द सुगन्ध पवनादि रसमुद्दीपयन्ति प्रकाशयन्ति च काव्यनाट्ययो: यत् अलौकिकम् व्यापारम् जायते। तस्मिन् अलौकिके व्यापारे विभावादिनाम् महत्वपूर्णम् स्थानं वर्तते। रत्यादि उद्बोधने नायक-नायिका: एव कारणभूता: सन्ति। रसास्वादे विभावावादया: आस्वादयोग्यस्य वातावर्णस्य निर्माणम् कुर्वन्ति। विभावस्य प्रकारद्वयम् भवति। आलम्बनविभाव: उद्दीपनविभावशचये विभावादिनाम् विषये धनंज्जय भोज विश्वनाथ अल्लराज विद्यानाथादिभि: पूर्वाचार्यै: भेदद्वयम प्रदर्श्य सम्यक्तया निरूपणम् कृतम् वर्तते। तन्मते यस्य आलम्बनं स्वीकृत्य रसस्य निष्पत्ति: भवति, सैवआलम्बनविभावा: तथा ए रसमुद्दीपयन्ति ते उद्दीपनविभावा:। कामिनीनाम हृदयै यस्मात्कारणात् रति: समुत्पन्नाभवति। ते एव उद्दीपनविभावा: साकामिनी

आलम्बन विभाव: भोज, विश्वनाथादिनामतेरप्येतद् एव मतम् विभावादिनाम् स्वरूपम् तथा भेदान्-प्रदर्श्य भानुदत्तमिश्रेण श्रृंगार रसे जायमानम् विभावादिनाम् विवेचनम् कृतम वर्तते। तथा आलम्बन उद्दीपन विभावयो: पृथक-पृथक् वर्णनम् कृतम् वर्तते। नायिकादया: शृंगार रसस्य आलम्बन विभावा:। एवम् भिन्न-भिन्न नवरसेषु तस्य: आलम्बनोद्दीपनं च भिन्न-भिन्न रूपेण भवति।

अनुभाव विषये भानुदत्त मिश्रेण रसमनुभावयन्ति ते अनुभावा: इति प्रोक्तम्। आचार्य शारदातनय तथा धनञ्जयेन अनुभावो विकारस्तु भावसंसूचनात्मका: मुखविक्षेप कटाक्षादि: विभाव: हृदयस्थिता:। तन्मते विभावत्वेन अनुभाव: अपि शरीरजनित विकारा: एव। नायिकाम् दृष्ट्वा बाहुविक्षेप कटाक्षादि या किया व्यापारा: जायते सैव अनुभावा:। भानुदत्तमिश्रमते कटाक्षादिरैव अनुभावा: कामिनीनाम् कटाक्षम् दृष्ट्वा पुरूषाणाम् मनसि मनोविकारा: जायन्ते। अनुभावो चतुर्धाभवति। कायिक मानसिक आहार्य तथा सात्त्विकश्च। भुजकटाक्षादि कायिक अनुभावत्वेन प्रमोदादि मानसिक अनुभावत्वेन चतुर्भुजस्य ज्ञानम् आहार्यादि अनुभावत्वेन रोमांचादि सात्त्विक अनुभावत्वेन कथ्यन्ते।

नायक-नायिकायो: प्रेमालाप समये स्तंभ स्वेद रोमांच स्वरभंग वेपथु: वैवर्ण्यम् अश्रुप्रलयम् इति अष्टौ सात्त्विकभावा: उद्दपद्यन्ते रसनिष्पत्तौ तेषाम् महत्वपूर्णम् योगदानम् वर्तते। रसनिष्पत्ति प्रक्रियायाम् एतेषां विभाव अनुभाव व्यभिचारीभावानाम् महत्वपूर्णम् योगदानं वर्तते विशेषेण चरन्तिइति व्यभिचारिभावा: यथा समुद्रे जायमाना: कल्लोंला: उत्पद्यन्ते विलीयन्ते च तथैव व्यभिचारिभावा: अपि शरीरे उत्पद्यन्ते विलीयन्ते च। स्थायीभावेन सह व्यभिचारिभावानाम् पोष्य-पोषक सम्बन्धो भवति। रोमाञ्चादि भावा: व्यभिचारि भावेन सह एव तादात्मयम् स्थापयन्ति।

अस्य शोधप्रबन्धस्य मुख्य निरूपणम् नायक-नायिका भेदविमर्श: वर्तते। आचार्य भरतमुनिप्रतिपादितस्य रससूत्रस्य आलम्बन विभावत्वेन नायक-नायिका

एव मुख्यो विषयः। अतः नायक-नायिका विषये निरूपणात् पूर्वम् विभावादिनाम् चर्चा मया अत्र उपस्थापितः। नायक नायिका भेद विमर्शनात् पूर्वम् आलम्बनोद्दीपन विभावस्य व्यभिचारिभावस्य ज्ञानं आवश्यकम् भवति। रसप्रक्रियायाम् नायक-नायिका भेदस्य चर्चा आवश्यकी भवति। काव्यशास्त्रे नायक-नायिकायाः अनेकेभेदाः वर्णिताः सन्ति। तेषु सर्वेषु भेदप्रभेदेषु चर्चा अत्र आवश्यकी भवति। नायिकायाः विविधानाम् अलंकाराणाम् भावहाव हेलादीनाम् अध्ययनेनविना नायिका भेदो अपि संपूर्णताम् न याति। काव्येशास्त्रे श्रृंगारस्य रसराजत्वेन प्रतिष्ठा कृताः वर्तते। यथा शृंगारोऽयम् रसानांराजा तथैव अन्येषाम् रसानाम् अपि नायक-नायिका भेदेषु समानभावम् भजन्ते।

समाजस्य दर्पणम् साहित्यमेव। सामाजिक जीवने यथा भिन्न-भिन्न गुणशीलाः पुरूषाः भवन्ति। तथैव स्त्रियाः अपि भिन्न-भिन्न गुण शीलाः भवन्ति। साहित्य शास्त्रे अपि अनुकूल दक्षिण घृष्ठ शठ भेदात् चतुर्विधा नायकाः भवन्ति। तथैव नायिकाः अपि स्वकीया परकीया साधारणस्त्री इति भेदेन त्रिधा भवन्ति। यद्यपि नायिकाअपेक्षया नायकानाम् गणना न्यूना वर्तते। तथापि साहित्यशास्त्रे तेषां महत्वपूर्णम् योगदानं वर्तते नायक अपेक्षया नायिकायाः आवान्तर भेदाः बहवः भवन्ति।

'नी' धातोः नायिकाशब्दस्य व्युत्पत्तिः। नीयते अनेन इति वा नायकः, नयति वशीकरोति सा तु नायिका। नायक+टाप् = नायिका।

अथ का नाम नायिका? काचित् कामिनी (कमनीयते सर्व कामम् इति कामिनी) रूपयौवनवस्त्रालंङ्कारः स्त्रक्चन्दनादिसम्प्रपिन्नाः कायिकवाचिकादिचतुर्विधाभिनयेन नयति वशीकरोति नायकं सा तु नायिका। स्वस्वामिनं सुखयति सा तु स्वकीया नायिका। परस्वामिनं आह्लादयति सा तु परकीया नायिका। इयमेव कामिनी वित्तमात्रं समालोक्य सर्वान् जनान् सुखयति आह्लादयति सा तु वेश्या सर्वकीया नायिका। नायिका त्रिविधा भवति स्वकीया, परकीया साधारणस्त्री इति च।

काव्यशास्त्रे लक्षाधिका: नायिका: वर्णिता: सन्ति। कतिविधा नायिका: भवन्ति इत्यपेक्षायां केचिद् अष्टाविंशतिशतसंख्याका: केचिच्च सहस्त्रमुपसहस्त्रं, केचिच्च लक्षादाधिकं नायिकानां भेदा: प्रतिपादयन्ति। उक्तं च मार्कण्डेयपुराणेलक्षादप्यधिकंदुर्गासप्तशत्याम्-

किं वर्णयाम तव रूपमचिन्त्यमेतद्,
किं चाहवेषु चरितानि तवाद्भुतानि।

(अ. 4. श्लोक)

गृहकर्मपरा विनयार्जवादिगुणैर्युक्ता पतिव्रता स्वकीया नायिका। स्वकीयाऽपि त्रिविधा भवति मुग्धा मध्या प्रगल्भा चेति। मुग्धाऽपि त्रिविधा अंकुरितयौवना, ज्ञाताज्ञातयौवना च। सा एव क्रमश: लज्जाभयपराधीना नवोढ़ा विश्रब्ध नवोढ़ा च।

साहित्यदर्पणे वर्णितमिदं पद्यम्--

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै:,
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्यं पत्युर्मुखम्।
विश्रब्धं परिचुम्ब्य जातपुलकामालोक्यगण्डस्थलीतम्,
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता।।

(सा. द. प्र. प. श्लो. 4)

मुग्धानायिका प्रियं दृष्ट्वा व्रीडा दर्शयति सम्मुखं न पश्यति। बहुविधपृच्छ्यमानाऽपि सस्मितं मंदं-मंदं प्रत्युत्तरं ददाति। लतागुल्मादिमध्ये आम्त्य प्रियं पश्यति। प्रसङ्ग: प्राप्य अन्यै:, प्रविर्तताम् एकाग्रचित्तमनसा प्रियतमस्य शाश्वत् गुणादिवर्णनं श्रृणोति। कुमारसंभवे यथा-

एवं वादिनि देवर्षो पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती।।

(6.84)

मुग्धानायिका प्रियतमस्य समीपे बहुकालमुपस्थितिं नेच्छति। रतौ वामा मुग्धा नायिका दंतक्षतनखक्षतादिसंभोगचिह्नोद्घाटनेन तथा च चुम्बनेन विलापं करोति। यथा एकशय्याशयनेनैव बालका नामइवअश्रु भवति तथैव हि साऽपि संभोगसमये उत्तानं शेतेति। मुग्धापेक्षया मध्या प्रगल्भा किञ्चिदधिका कामकला कलापनिपुणा विचित्रसुरतशीला च। मध्या प्रगल्भा प्रियस्य समीपे अनलंकृता न गच्छति। अवसरं प्राप्य केशसंचम्व्याधेन बाहुमूलं स्तन च स्फुटं दर्शयति। अधोवस्त्रपरिधान व्याधेन च नाभिपंकज दर्शयति। सखीनां मध्ये-प्रियस्य प्रशंसां करोति। प्रियस्य दुःखे दुःखिनी सुखे च सुखिनी भवति। तथा च दूरात् प्रियं दृष्ट्वा "पश्यतु माम्" इति कामविकारमभाषते। मध्यापेक्षया। प्रगल्भा अधिका संभोगशीला भवति। सुरतक्रीडानन्दानुभवेन वशीकृतो नायको यथा सा प्रगल्भा आक्रान्तनायका। साहित्यदर्पणे वर्णितमिदं पद्यम्--

स्वामिन्भङ्गुरयालकं सतिलकं भाले विलासिन्कुरू,
प्राणेश त्रुटितं पयोधरतटे हारं पुनर्योजय।
इत्युक्त्वा सुरतावसानसमये सम्पूर्णचन्द्रानना,
स्पृष्टा तेन तथैव जात पुलका प्राप्ता पुनर्मोहनम्।।

(सा. दर्पणः तृ. पृ. श्लो. नं. 60)

मध्या प्रगल्भा प्रत्येकं मानावस्थायां धीराधीरादिभेदेन षड्विधां भवति। धीरादिषड्भेदाः द्विविधा जयेष्ठा कनिष्ठा च। परिणीतत्वे सति भर्तुर्न्यूनस्नेहा कनिष्ठा अधिकस्नेहा जयेष्ठा कनिष्टाद्विभेदेन द्वादश प्रकारका भवति।

अप्रकटपर पुरूषानुरागा परकीया सा च द्विविधा भवति परोढ़ा कन्यका तथा। परेण ऊढा अर्थात् परेण विवाहिता परोढ़ा अपरिणीता कन्यका। रत्नावलीनाटिकायाः सागरिकायाः उक्तिरियम्--

"दुर्लभजनानुरागो लज्जागुर्वीपरवश आत्मा।
सखि मरणमिवशरणम्।

इयं नायिका प्रियतमं वीक्ष्य तत्सम्मुखे व्यर्थमेव हासं कुरूते। नायकं दृष्ट्वा बध्धमपि केशपाशं मोचयति। कर्ण कण्डूयति जम्भयति अंगं स्फोटयति बालमाश्लिष्य चुम्बति, अंगुष्ठग्रेणं लिखति सकटाक्षं निरीक्षते तथा च प्रियतम् दृष्ट्वा सरत्या ललाटे तिलकक्रियां रचयति।

श्रीमद्भागवते वर्णितमिदं पद्यम्---

कृत्वा मुखान्यवशुचः श्वसनेन शुष्यद्बिम्बाधराणि चरणेन भुवं लिखन्त्यः।

इयं नायिका नायकं दृष्ट्वा अधरं दशति मुखमधः कृत्वा प्रेमालापं करोति।

अन्यां नायकेन सह दृष्ट्वा शंका करोति।

काव्यप्रकाशे वर्णितमिदं पद्यम्---

निश्शेषच्युतचन्दनं स्तनतटं निमृष्टरागोऽधरो,
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे,
वापीं स्नातुमितो गताऽसि न पुनस्तस्याधमस्यान्तिकम्।।

(प्र 3, श्लो. सं. -2)

गुप्ता विदग्धा, लक्षिता कुलटा अनुशयना मुदिता प्रभृतीनां परकीयायमेवान्तर्भावः। गुप्ता त्रिधा भवति वृत्तसुरतगोपना, वर्तिस्यमाणसुरतगोपना, वृत्तवर्तिष्यमाणसुरतगोपना चेति।

सर्वजनानुरागिणी वेश्या सामान्यनायिका। गुर्जरभाषायां 'चालु' शब्देनेति बोध्यते उक्तं च मृच्छकटिके--

"वाप्यां स्नाति विचक्षणो द्विजवरो मूर्खोऽपि वर्णाधमः,
फुल्लां नाम्यति वायसोऽपि हि लतां या नामिता बार्हणा।
ब्रह्मक्षत्रविशस्तरन्ति च यथा नावा तथैवेतरं,
त्वं वापीव लतेव नौरिव जनं वेश्यासि सर्वं भज।।

(1.32)

आसां वेश्यानां प्राणवल्लभाः तस्कराः पण्डकाः मूर्खाः वैभवशालिनाः, प्रच्छन्नकामुकाश्चेति। उक्तं च मृच्छकटिके एषा नाणकमेषि काम कसिका, मत्स्याशिका, लसिका मिर्नाशा कुलनाशिका अवशिका कामस्य मञ्जुषिका एता वेशवधुः सुवशेनिलया वेशांगना वेशिका। (1.23)

एताः सामान्यनायिकाः प्रत्येकम् अष्टाभिः अवस्थाभिरष्टाविधाः प्रोषितपतिका खण्डिता कलहान्तरिता विप्रलब्धा विरहोत्कण्ठिला वासकसज्जा स्वाधीनपतिका अभिसारिका चेति। अभिसारिका नायिका मुग्धामध्यादिभेदेन सप्तधा भवति। केचिदभिसारिकाः क्षेत्रे, वाटिकाम् भग्नदेवालये दूतीगृहे वनमध्ये च अभिसरन्ति। केचिच्च श्मशाने नद्यादीनां तटे नगरपालिकोद्याने अभिसरन्ति पुंश्चली अभिसारिका ध्वान्तच्छन्नो गहनांधकारे अभिसरति। कश्चित् केषुचिद् गृहादिषु आश्रये भूत्वाभिसरन्ति।

एताः नायिकाः मिलित्वा अष्टाविंशत्याधिकशतं भवन्ति। तासामप्युत्तम् मध्यमाधर्मभेदगणनया चतुरधिकादशीति युतं शतत्रयं भेदाः भवन्ति। परन्त्वेतासां दिव्या दिव्योभयभेदेन गण्नया द्विपश्चाशदधिकशतयुतं शतत्रयं भेदाः भवन्ति। तासामपि पद्मिनीपट्मिति चित्रिणी शंखिनी हस्तिनी मयूरी नागिनी, काफिनी, बातुला प्रित्तला, प्रकृत्यादिभेदगणनदा लक्षाद्दप्यदिकं भवन्ति।

पद्मिनी चन्द्रवदना च शिरीषमृदुला तथा शंखिनी स्याद्बृहन्मध्या पीनस्तनी तथा। हस्तिनी बहुंमुक् कुरा वातिनी दृढ़रागा। वातुला तु कठोरंगी चंचल, कृष्ण माणिजा। श्यामधूसरवर्णा च बहुभोज्या प्रलायिनी। पित्तका शोणनयना गौरांगी कुशल रतो सा चतुर्था पुनरति नायिका प्रतिनायिका। (अनंग रंगम् अ. 2, श्लो. सं. 2,3,4)

जन्मकालतः एव मम साहित्यविषये रूचिआसीत्। स्नातक तथा अनुस्नातक काक्षायाम् मम् मुख्यविषयाः संस्कृतम् आसीत। तत्रापि अलंकारशास्त्रस्य मया अनेकानि पुस्तकानि अधीतानि तत्र मयानाद्यशास्त्रस्य अपि। तत्र अलंकारशास्त्रस्य मया अनेकानि पुस्तकानि अधितानि संस्कृत नाटकानाम अध्यनेन समालोचित् ग्रंथानाम अवलोकनेन मम् मनसि

महातीउत्कंठा पात्रालोचनम् अधिकृत्य अभवत् मम् पितृचरणै: रामसिंह महोदयौरपि माम एतस्मिन् कार्ये शोधकार्याय माम प्रेरणापद्वता। अता अहम काव्यशास्त्र विषयम् अधिकृत्य शोधकार्याय इतस्थत: भ्रमणम्कृतवती वर्षध्वयपूर्वम् वडोदरा विश्वविद्यालय काव्यशास्त्रे नायक–नायिका भेद विमर्स: विषयम् अधिकृत्य शोधकार्याय नामांकनम् कारितवती। काव्यशास्त्रो नायक–नायिका भेद विमर्श: एषा: विषया: प्राचीनोभूत्वाअपि नूतनम् एव लगति। एतस्मिन् विषयो बहुदिनादआरभ्ये अद्यावधि परियन्तम् कार्यम् न जातम् मम् दृष्ट्या सारगर्भितोअयम् विषया: नूतनानाम साहित्य अध्येतृणाम् कृते प्रेरणादायको भविष्यति। युगेअस्मिन् जायमानेसु विविध परिवर्तनेसु एषा: विषया: सामाजिकानाम् काव्य नाटक रसिकानाम् कृते कियत् पर्यन्तम् रूचिकरो भविष्यति इति विचारणीय: विषय: अस्ति।

अद्यापि नाट्यशास्त्रीये संसारे जायमानेषु नूतनातिनूतन प्रयोगेषु शोधप्रबन्धोउऽयम् कियत् लाभकरी भविष्यति। इति एष: अपि एक: चिन्तनीया विषयम:। शोध कार्येऽस्मिन् एष: प्रयत्न: अधिकंअपि जानन्ति तान्प्रति नास्ति। अपितु अस्यप्रयोगम् वांक्षितुम् इच्छन्ति तान्प्रति एष: प्रयास: मया कृतम् वर्तते। विदुषाम् सहायेन विना एतत् कार्यम् शक्यम् न आसीत्। तेषां नामानि यदि अहम् अत्र न लिखिस्यामि तत्र मम् महानदोषा:। एतस्मिन् कार्ये पुष्पाभगिनी उमराजवाला वड़ोदरा विश्वविद्यालयस्य परंपरागत् संस्कृत विभागस्य डॉ. रामपाल शुक्ल: प्राचार्य: श्री योगेश ओझा महोदयान अपि यत् मार्गदर्शनम् कृतम् ततकदापि अहम् न विस्मरामि। मम् मार्गदर्शक: डॉ. हरिप्रसाद पांडेय महोदयै: एतस्मिन् कार्ये यत मार्गदर्शनम् कृतम् तेन अहम् उपकृतोऽस्मि।

अस्य शोधप्रबन्धस्य प्रथमऽध्याये शोधप्रबन्धस्य भूमिका विषयकम् विवर्णम् मया विलिख्य परंपरया: प्राप्ताम् काव्य–शास्त्रीय परंपराम् मया अत्र अवतार्य वर्णितम् वर्तते। पृष्ठभूमौ आलम्बन उद्दीपन विभावादीनाम् रसविषयकान् नायक–नायिकयो: प्रसंगान्अपि अत्र वर्णितम् वर्तते। एतस्मिन्

अध्याये काव्यलक्षणम् काव्यप्रयोजनम् काव्यभेदान् निरूप्य काव्यशास्त्रयो: संबन्धान अपि निर्वर्ण्य काव्यशास्त्रीय परंपराया: विवेचनम् मयाकृतम् वर्तते।

द्वितीयेऽध्याये अभिधा विमर्श: लक्षणा विमर्श: व्यंजना विमर्श: वस्तु अलंकार: रसरूपस्य ध्वनिभेदस्य चर्चा कृता वर्तते।

तृतीयेऽध्याये रसनिष्पत्ते: विभावानाम् योगदानं विभाव, अनुभाव व्यभिचारिभावानाम् चर्चा मया विहिता।

चतुर्थेऽध्याये नायक भेदा: तस्य सहायकानाम् अपि चर्चा कृतावर्तते।

पंचमेऽध्याये नायिकाया: विविधान् भेदान् विमृश्य तस्या: मुग्धा मध्या-प्रगल्भा कुलटा, अनुशयना युक्ता ज्ञात-अज्ञात यौवनाया: चित्रणम् अत्र मया कृतम् वर्तते। तत् पश्चात् खंडिता कलहान्तरिता, विप्रलब्धा, अभिसारिकादिनाम् नायिकानाम् काव्यशास्त्रीय परंपरायाम् चतुरस्त्रया निरूप्य सम्यक् विमृश्य प्रबंधेअस्मिन आवश्यकता अनुसारेण मया चर्चितम् वर्तते।

षष्ठेऽध्याये काव्येषु नायक-नायिका भेद-विमर्श:। नाटकेषु नायक-नायिका भेद विमर्श:। कथाषु नायक-नायिका भेद विमर्श: मया कृता वर्तते।

सप्तमेऽध्याये उपसंहार रूपेण नायक-नायिका भेदविमर्शाख्य वर्णनम् मया कृतम् वर्तते।